International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 123-126
© 2026 IJMH
www.themultijournal.com
Received: 18-07-2026
Accepted: 12-08-2026
Publish : 13-08-2026

**SOUMEN ROY**
Ph.D. Research Scholar,
Department Of Education,
National Sanskrit University,
Tirupati,Andhra Pradesh ,India

**Correspondence:**
**SOUMEN ROY**
Ph.D. Research Scholar,
Department Of Education,
National Sanskrit University,
Tirupati,Andhra Pradesh ,India

# स्वामीविवेकानन्दस्य शिक्षादर्शनस्य अखिलभारतीय-विवेकानन्द-युवामहामण्डले व्यवहारिकप्रयोगः , एकम् अध्ययनम्

**Practical Application of Swami Vivekananda's Educational Philosophy in Akhil Bharat Vivekananda Yuva Mahamandal : A Study**

**SOUMEN ROY**

**सारांशः-**

स्वामीविवेकानन्दस्य शिक्षादर्शनं भारतीयशैक्षिकचिन्तनस्य महत्त्वपूर्णः अध्यायः अस्ति। तस्य दृष्ट्या शिक्षा केवलं पुस्तकीयज्ञानस्य सञ्चयः न, अपितु मनुष्यस्य अन्तर्निहितशक्तीनाम् अभिव्यक्तिः, चरित्रनिर्माणम्, आत्मविश्वासविकासः, मनःशक्तेः विकासः तथा मानवसेवायाः भावना च अस्ति। तस्य शिक्षादर्शनस्य केन्द्रे मनुष्यनिर्माणम्, चरित्रनिर्माणम्, आत्मनिर्भरता, निर्भीकता, एकाग्रता, सेवा तथा नेतृत्वम् इत्यादयः प्रमुखाः तत्त्वाः सन्ति। अखिलभारतीय-विवेकानन्द-युवामहामण्डलः स्वामी-विवेकानन्दस्य एतेषां शैक्षिकविचाराणां युवसमाजे व्यवहारिकप्रयोगं कर्तुं प्रयतते। प्रस्तुतशोधपत्रे महमण्डलस्य ऐतिहासिककार्यक्रमानां माध्यमेन स्वामीविवेकानन्दस्य शिक्षादर्शनस्य व्यवहारिकरूपस्य अध्ययनं क्रियते। विशेषतः साप्ताहिकपाठचक्रः (weekly Study circles), एकदिवसीय प्रशिक्षणशिविरः (one day Youth Training Camp),क्षेत्रीय युवप्रशिक्षणशिविरः(zonal youth Training Camp), सर्वभारतीय युवप्रशिक्षण शिविरः( Annual All India Youth Training Camp), किशोर-प्रशिक्षणकार्यक्रमाः,विवेकवाहिनी(Child Training), सेवाकार्याणि, नेतृत्वप्रशिक्षणम् तथा प्रकाशनपरम्परा इत्येतेषां विश्लेषणं क्रियते। प्रस्तुताध्ययनं ऐतिहासिक-वर्णनात्मक-अभिलेखीयपद्धत्याधारितम् अस्ति। संस्थायाः आधिकारिकप्रकाशनानि, वार्षिकप्रतिवेदनानि, Vivek-Jivan पत्रिका, विवेक अञ्जन पत्रिका, प्रशिक्षणशिबिरसम्बद्धाः अभिलेखाः तथा स्वामीविवेकानन्दस्य मूलरचनाः प्रमुखस्रोतत्वेन स्वीक्रियन्ते। अध्ययनात् ज्ञायते यत् महमण्डलस्य कार्यपद्धतिः विवेकानन्दस्य शिक्षादर्शनस्य विचारः → अभ्यासः → अनुभवः → सेवा → व्यक्तित्वविकास इति क्रमेन व्यवहारिकरूपं प्रस्तुतयति। अस्य अध्ययनस्य निष्कर्षः अस्ति यत् विवेकानन्दस्य शिक्षा-दृष्टिः केवलं ऐतिहासिकवैचारिकविषयः नास्ति, अपितु आधुनिकयुवशिक्षायाः, चरित्रनिर्माणस्य तथा सामाजिकनेतृत्वस्य कृते अपि प्रासङ्गिका अस्ति।

**प्रमुखशब्दाः:** स्वामीविवेकानन्दः, शिक्षादर्शनम्, मानव-निर्माणम्, चरित्रनिर्माणम्, विवेकानन्द-युवामहामण्डलः, युवा-प्रशिक्षणम्, सेवाकार्यम्, नेतृत्वम्, ऐतिहासिकाध्ययनम्।

## 1. प्रस्तावना-

शिक्षा मानवजीवनस्य सर्वाधिकमहत्त्वपूर्णेषु प्रक्रियासु अन्यतमा अस्ति। शिक्षा व्यक्तेः केवलं बौद्धिकविकासं न करोति, अपितु तस्य भावनात्मकं, नैतिकं, सामाजिकं तथा आध्यात्मिकं व्यक्तित्वमपि निर्माति। आधुनिकशिक्षाव्यवस्थायां परीक्षाफलम्, रोजगारक्षमता तथा ज्ञानार्जनम् इत्यादीनां विषये विशेषः बलः दीयते। किन्तु मनुष्यस्य समग्रविकासाय आत्मविश्वासः, चरित्रम्, आत्मानुशासनम्, नेतृत्वम्, सेवाभावना तथा सामाजिकदायित्वम् अपि आवश्यकम् अस्ति। एतादृशे सन्दर्भे स्वामीविवेकानन्दस्य शिक्षादर्शनम् अत्यन्तं प्रासङ्गिकं भवति। सः शिक्षां जीवननिर्माणस्य तथा मानव-

निर्माणस्य साधनरूपेण दृष्टवान्। तस्य शिक्षा-दर्शनस्य उद्देश्यं केवलं सूचनाप्रदानं न, अपितु व्यक्तेः अन्तर्निहितशक्तीनां जागरणम् आसीत्। अखिलभारतीय-विवेकानन्द-युवामहामण्डलः स्वामीविवेकानन्दस्य एतादृशविचाराणां युवसमाजे व्यवहारिकप्रयोगाय कार्यं करोति। अतः महमण्डलस्य कार्यपद्धतेः ऐतिहासिकाध्ययनं विवेकानन्दस्य शिक्षादर्शनस्य व्यवहारिकरूपं ज्ञातुं महत्त्वपूर्णं साधनम् अस्ति।

**2. स्वामीविवेकानन्दस्य शिक्षादर्शनस्य आधारभूततत्त्वानि-**

स्वामीविवेकानन्दस्य शिक्षादर्शनस्य प्रमुखतत्त्वानि निम्नलिखितानि सन्ति—

2.1 **मानव-निर्माणम्-** विवेकानन्दस्य शिक्षादर्शने शिक्षा "मनुष्यनिर्माणस्य" प्रक्रिया अस्ति। विद्यार्थी केवलं परीक्षार्थी न भवेत्, अपितु सः सुदृढचरित्रयुक्तः, आत्मविश्वाससम्पन्नः तथा उत्तरदायी नागरिकः भवेत्।

2.2 **चरित्रनिर्माणम् -** शिक्षायाः प्रमुखं लक्ष्यं चरित्रनिर्माणम् अस्ति। सत्यनिष्ठा, आत्मसंयमः, साहसम्, अनुशासनम् तथा सेवाभावना चरित्रस्य आधाराः सन्ति।

2.3 **अन्तर्निहितशक्तीनाम् अभिव्यक्तिः -** विवेकानन्दस्य दृष्ट्या प्रत्येकस्मिन् मानवस्मिन् अन्तर्निहितशक्तिः अस्ति। शिक्षा तस्याः शक्तेः विकासाय अवसरं दातव्यम्।

2.4 **आत्मविश्वासः तथा निर्भीकता -** विद्यार्थी स्वसामर्थ्ये विश्वासी भवेत्। भयमुक्तः तथा निर्भीकः विद्यार्थी जीवनस्य समस्याः अधिकं प्रभावीभूततया सम्मुखीकर्तुं शक्नोति।

2.5 **एकाग्रता -** मनसः एकाग्रता अध्ययनस्य तथा व्यक्तित्व-विकासस्य महत्त्वपूर्णा आवश्यकता अस्ति। अतः मनोनिग्रहः तथा concentration विवेकानन्दस्य शिक्षादर्शने महत्त्वपूर्णौ स्तः।

2.6 **सेवा -** "मानवसेवा" विवेकानन्दीयचिन्तनस्य महत्त्वपूर्णः पक्षः अस्ति। शिक्षा समाजहिताय प्रयुज्येत इति तस्य व्यापकदृष्टिः आसीत्।

2.7 **नेतृत्वम् -** शिक्षा विद्यार्थिनं केवलं अनुयायिनं न, अपितु उत्तरदायी नेतृत्वकर्ता कर्तुं समर्था भवेत्।

**3.अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य ऐतिहासिकपृष्ठ-भूमिः-**

अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य कार्यदर्शनं स्वामी-विवेकानन्दस्य मानव-निर्माण तथा चरित्रनिर्माणविचारयोः आधारेण विकसितम् अस्ति। महमण्डलस्य युवा-प्रशिक्षणकार्यस्य ऐतिहासिकविकासे 1967 वर्षस्य विशेषं महत्त्वम् अस्ति। संस्थायाः आधिकारिकविवरणानुसारं प्रथमं Annual All India Youth Training Camp 1967 तमे वर्षे लगभग 100 प्रतिभागिभिः आयोजितम्। दीर्घकालीनविकासस्य परिणामरूपेण 2016 तमे वर्षे 50 तमे Annual All India Youth Training Camp मध्ये प्रायः 2,400 प्रतिभागिनः सहभागी अभवन्। एषः विस्तारः कार्यक्रमस्य दीर्घकालीनसातत्यं तथा युवानां सहभागितायाः विकासं दर्शयति। अतः महमण्डलस्य इतिहासः केवलं संस्थायाः इतिहासः न, अपितु विवेकानन्दीययुवशिक्षाविचारस्य व्यवहारिकविकासस्य इतिहासः अपि अस्ति।

**4. शोधस्य उद्देश्याः-**

प्रस्तुतशोधस्य प्रमुखोद्देश्याः सन्ति—

i. स्वामीविवेकानन्दस्य शिक्षादर्शनस्य प्रमुखतत्त्वानां अध्ययनम्।

ii. अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य ऐतिहासिककार्यस्य अध्ययनम्।

iii. विवेकानन्दस्य शिक्षाविचाराणां महमण्डले व्यवहारिकप्रयोगस्य विश्लेषणम्।

iv. Youth Training Camp इत्यस्य शैक्षिकभूमिकायाः अध्ययनम्।

v. Study Circle इत्यस्य शिक्षणात्मकमहत्त्वस्य विश्लेषणम्।

vi. सेवाकार्येषु तथा नेतृत्वकार्यक्रमेषु विवेकानन्दीयशिक्षादर्शनस्य प्रयोगं ज्ञातुम्।

vii. आधुनिकयुवशिक्षायां विवेकानन्दस्य शिक्षादर्शनस्य प्रासङ्गिकतां विवेचितुम्।

**5. शोधप्रश्नाः-**

i. स्वामीविवेकानन्दस्य शिक्षादर्शनस्य प्रमुखाः तत्त्वानि कानि?

ii. एतेषां तत्त्वानां महमण्डलस्य कार्यक्रमेषु व्यवहारिकप्रयोगः कथं दृश्यते?

iii. Youth Training Camp विवेकानन्दीयशिक्षादर्शनं कथं मूर्तरूपं ददाति?

iv. Study Circle विद्यार्थिनां व्यक्तित्वविकासे किं योगदानं करोति?

v. सेवाकार्येषु सहभागिता विवेकानन्दस्य शिक्षाविचारैः कथं सम्बध्यते?

vi. आधुनिकयुवशिक्षायां महमण्डलस्य कार्यपद्धतेः किं महत्त्वम् अस्ति?

**6. शोधपद्धतिः-**

प्रस्तुतशोधः Historical, Descriptive and Documentary Research Method इत्यस्य आधारेण निर्मितः अस्ति।

***प्राथमिकस्रोताः***

i. ABVYM इत्यस्य आधिकारिकप्रकाशनानि।

ii. Annual Reports.

iii. Impact Statements.

iv. Vivek-Jivan पत्रिका।

v. Youth Training Camp सम्बन्धित अभिलेखाः।

vi. संस्थागतकार्यक्रमविवरणानि।

vii. उपलब्धभाषणानि तथा पत्राणि।

द्वितीयकस्रोताः

i. The Complete Works of Swami Vivekananda

ii. Lectures from Colombo to Almora

iii. पत्रावली

iv. स्मामीशिष्यसम्वादः

v. स्मृतीरआलोके विवेकानन्दः

vi. विवेकानन्दस्य शिक्षादर्शनसम्बद्धाः ग्रन्थाः।

vii. आधुनिकशोधलेखाः।

viii. रामकृष्ण-विवेकानन्द-साहित्यं।

ix. ऐतिहासिकस्रोताणां बाह्य तथा आन्तरिक आलोचनया संस्थायाः कार्यविकासः तथा शिक्षादर्शनस्य प्रयोगः विश्लेष्यते।

**7.युवप्रशिक्षणशिविरः ( Youth Training Camp ) —** शिक्षा-दर्शनस्य व्यवहारिकप्रयोगः Youth Training Camp महमण्डलस्य कार्यपद्धतेः प्रमुखः भागः अस्ति। संस्थायाः

आधिकारिकविवरणानुसारं प्रशिक्षणशिबिरेषु life-building, character-building, concentration of mind तथा leadership इत्यादिषु विषयेषु प्रशिक्षणं दीयते। एतत् विवेकानन्दस्य शिक्षादर्शनस्य प्रत्यक्षव्यावहारिकरूपं भवति।

**विचारः-** विवेकानन्दस्य जीवननिर्माणसम्बद्धाः विचाराः प्रतिभागिभ्यः प्रस्तुत्यन्ते।

**अभ्यासः-** प्रतिभागिनः सामूहिककार्येषु तथा प्रशिक्षणकार्यक्रमेषु सहभागी भवन्ति।

**अनुभवः-** ते स्वस्य क्षमतां व्यवहारिकपरिस्थितौ परीक्षन्ते।

**परिणामः-** आत्मविश्वासः, नेतृत्वम्, अनुशासनम् तथा सामाजिकदायित्वबोधः विकसितुं अवसरः प्राप्यते।

**8. पाठचक्रम् (Study Circle)** — ज्ञानात् अनुभवपर्यन्तम् महमण्डलस्य Study Circle पद्धतिः विवेकानन्दीयशिक्षादर्शनस्य महत्त्वपूर्णः प्रयोगः अस्ति। अध्ययनचक्रेषु विवेकानन्दस्य विचाराः पठ्यन्ते तथा तेषु चर्चा क्रियते। एषा पद्धतिः traditional lecture-based education इत्यस्मात् भिन्ना अस्ति। विद्यार्थिनः पठन्ति,मननं कुर्वन्ति,प्रश्नान् पृच्छन्ति,विचारान् व्यक्तयन्ति,चर्चां कुर्वन्ति, व्यवहारिकजीवने तान् प्रयोजयितुं प्रयतन्ते। अतः Study Circle knowledge transmission इत्यस्मात् knowledge application इति दिशि गच्छति।

**9. चरित्रनिर्माणम्-** विवेकानन्दस्य शिक्षादर्शनस्य केन्द्रबिन्दुषु चरित्रनिर्माणम् अन्यतमम् अस्ति। महमण्डलस्य कार्येषु चरित्रनिर्माणं निम्नलिखितैः उपायैः सम्बद्धं दृश्यते आत्मानुशासनम्। नियमिताध्ययनम्। सत्यनिष्ठा।सेवाभावना। उत्तरदायित्वम्। सामूहिकजीवनम्। आत्मनिर्भरता। एते गुणाः विद्यार्थिनां जीवनस्य केवलं शैक्षिकक्षेत्रे न, अपितु सामाजिकजीवने अपि उपयोगिनः भवन्ति।

**10. नेतृत्वप्रशिक्षणम् -** विवेकानन्दस्य दृष्ट्या युवाशक्तिः राष्ट्रस्य महत्त्वपूर्णा शक्ति अस्ति। महमण्डलस्य प्रशिक्षणकार्यक्रमेषु युवानां नेतृत्वक्षमतायाः विकासः महत्त्वपूर्णः पक्षः अस्ति।नेतृत्वप्रशिक्षणस्य माध्यमेन विद्यार्थी निर्णयं करोति → उत्तरदायित्वं स्वीकरोति → समूहं संयोजयति → समस्यां समाधत्ते → अनुभवात् शिक्षते। अनेन विद्यार्थिषु आत्मविश्वासः तथा नेतृत्वक्षमता विकसितुं शक्नोति।

**11. सेवाशिक्षा-**विवेकानन्दस्य शिक्षादर्शनं समाजसेवया सम्बद्धम् अस्ति। ज्ञानस्य वास्तविकमूल्यं तदा दृश्यते यदा तत् मानवहिताय प्रयुज्यते। महमण्डलस्य विभिन्नकेन्द्रेषु निःशुल्कशिक्षा, प्रशिक्षणकक्षा( coaching classes), निशुल्क-चिकित्सालयः (medical service), छात्रावासः (students' homes ) तथा अन्यसेवाकार्याणि संचालितानि भवन्ति। सेवाकार्यं विद्यार्थिनः पुस्तकीयज्ञानात् सामाजिकानुभवस्य दिशि नयति। एतादृशः अनुभवः तेषु— सहानुभूतिम्, सामाजिकदायित्वम्, सहयोगभावनाम्, नेतृत्वम्, आत्मविश्वासम् च विकसितुं शक्नोति।

**12. किशोरशिक्षा-** किशोरावस्था व्यक्तित्वनिर्माणस्य अत्यन्तसंवेदनशीलः कालः अस्ति। महमण्डलेन किशोराणां कृते पृथक् training methodology विकसितेति संस्थायाः आधिकारिकसामग्री सूचयति। एतादृशः आयु-अनुकूलः कार्यक्रमः विवेकानन्दीयशिक्षादर्शनस्य अनुकूलनशीलतां प्रदर्शयति। किशोराणां कृते शिक्षा केवलं पाठ्यपुस्तकाधारितं न भवेत्; तेषां चरित्रम्, आत्मविश्वासः, अनुशासनम् तथा सामाजिकदायित्वम् अपि विकसितव्यम्।

**13. प्रकाशनपरम्परा तथा वैचारिकशिक्षा- Vivek-Jivan** महमण्डलस्य महत्त्वपूर्णं प्रकाशनम् अस्ति। आधिकारिकस्रोतस्य अनुसारं एतत् प्रकाशनं 1968 तः प्रकाशितम् अस्ति। पत्रिकायाः माध्यमेन— विवेकानन्दस्य विचाराः, युवानां समस्याः, चरित्रनिर्माणम्, शिक्षादर्शनम्, सामाजिकविषयाः, प्रशिक्षणकार्यक्रमाः इत्यादयः विषयाः चर्च्यन्ते। ऐतिहासिकशोधस्य दृष्ट्या Vivek-Jivan इत्यस्य archive महत्त्वपूर्णः प्राथमिकस्रोतः भवितुम् अर्हति। अस्य systematic content analysis द्वारा विवेकानन्दीयशिक्षाविचारस्य कालक्रमिकविकासः ज्ञातुं शक्यते।

**14. विवेकानन्दीयशिक्षादर्शनम् — महमण्डलस्य व्यवहारिककार्यं-**

| विवेकानन्दीयतत्त्वम् | महमण्डलस्य व्यवहारिककार्यक्रमः | अपेक्षितशैक्षिकपरिणामः |
|---|---|---|
| मानव-निर्माणम् | Youth Training Camp | समग्रव्यक्तित्वविकासः |
| चरित्रनिर्माणम् | Study Circle एवं प्रशिक्षणम् | नैतिकविकासः |
| आत्मविश्वासः | सामूहिककार्य एवं नेतृत्वम् | आत्मनिर्भरता |
| एकाग्रता | **मनसंयोगस्य प्रशिक्षणम्** (Concentration-related training ) | **मनोनियन्त्रनम्** |
| नेतृत्वम् | **युवप्रशिक्षणम्** (Youth Training Programme ) | नेतृत्वक्षमता |
| आत्मशक्तिः | विवेकानन्दविचाराध्ययनम् | आत्मविश्वासः |
| निर्भीकता | व्यवहारिककार्यक्रमाः | साहसम् |
| सेवा | सामाजिकसेवाकार्यम् | सामाजिकदायित्वम् |

**15. ऐतिहासिकः विश्लेषणम्** Historical Analysis - महमण्डलस्य इतिहासं यदि विवेकानन्दस्य शिक्षादर्शनस्य सन्दर्भे परीक्षामहे, तर्हि त्रयः प्रमुखाः चरणाः दृश्यन्ते— प्रथमः चरणः — विचारप्रसारः- विवेकानन्दस्य शिक्षाविचाराः युवानां मध्ये प्रसारिताः।

द्वितीयः चरणः — संगठनात्मकप्रयोगः- Study Circle तथा Training Camp इत्यादिभिः कार्यक्रमैः विचाराणां नियमिताभ्यासः प्रारब्धः। तृतीयः चरणः — सामाजिकप्रयोगः- सेवा, नेतृत्वम् तथा सामुदायिककार्यक्रमैः शिक्षादर्शनस्य सामाजिकव्यवहारः विकसितः।

एवं महमण्डलस्य कार्यपद्धतिः philosophy → pedagogy → practice → social action इति विकासक्रमं दर्शयति।

**16. प्रमुखाः निष्कर्षाः** - प्रस्तुत ऐतिहासिकाध्ययनात् निम्नलिखिताः निष्कर्षाः प्राप्तुं शक्यन्ते—

i. महमण्डलस्य शिक्षादृष्टेः मूलाधारः स्वामीविवेकानन्दस्य मानवनिर्माणदर्शनम् अस्ति।

ii. संस्था शिक्षां केवलं पुस्तकीयज्ञानपर्यन्तं न सीमयति।

iii. Study Circle पद्धतिः सहभागितामूलकशिक्षणस्य उदाहरणम् अस्ति।

iv. Youth Training Camp अनुभवाधारितशिक्षायाः अवसरं प्रददाति।

v.सेवाकार्यं शिक्षायाः सामाजिकपक्षं सुदृढं करोति।

vi.नेतृत्वप्रशिक्षणं युवानां उत्तरदायित्वबोधं विकसितुं सहाय्यं करोति।

vii.चरित्रनिर्माणम् तथा आत्मविश्वासविकासः संस्थायाः कार्यदर्शनस्य अभिन्नौ पक्षौ स्तः।

viii.महमण्डलस्य कार्यपद्धतिः आधुनिकमूल्याधारितशिक्षायै प्रासङ्गिका अस्ति।

ix.Vivek-Jivan तथा institutional reports संस्थायाः इतिहासस्य महत्त्वपूर्णस्रोताः सन्ति।

x.विवेकानन्दीयशिक्षादर्शनस्य व्यवहारिकप्रयोगः भारतीययुव-शिक्षायाः इतिहासे अध्ययनयोग्यः विषयः अस्ति।

**17. आधुनिकशिक्षायां प्रासङ्गिकता-** अधुना विश्वस्य शिक्षाव्यवस्थायां केवलं academic achievement इत्यस्य अपेक्षया holistic education इत्यस्मिन् अधिकं बलं दीयते। विद्यार्थिषु निम्नलिखितगुणाः आवश्यकाः सन्ति—

आलोचनात्मकचिन्तनम् (Critical thinking),आत्मविश्वासः (Self-confidence), नेतृत्वम् (Leadership), सम्पेषणात्मक-कौशलम् (Communication), समाजिकदायित्वम्(Social responsibility), भावनात्मकपरिपक्वता (Emotional maturity),

नैतिकजागरूकता (Ethical awareness) विवेकानन्दस्य शिक्षादर्शनं एतेषां गुणानां विकासाय भारतीयदृष्टिकोणं प्रददाति। महमण्डलस्य कार्यपद्धतिः दर्शयति यत् मूल्याधारितशिक्षा केवलं श्रणीकक्षे वक्तव्य (classroom lecture ) द्वारा न, अपितु कार्यक्रमः (activity), सहभागीता (participation), आलोचना (discussion) , परिसेवा अभिज्ञता च ( service and experience) द्वारा अधिकं प्रभावी भवितुमर्हति।

**18. अन्तरराष्ट्रीयपरिप्रेक्ष्यम् –** अधुना अन्तरराष्ट्रीयस्तरे holistic education, character education, experiential learning, leadership education तथा service learning इत्यादीनां अवधारणानां महत्त्वं वर्धमानम् अस्ति। विवेकानन्दस्य शिक्षादर्शनस्य विशेषता अस्ति यत् सः व्यक्तेः बाह्यदक्षतया सह आन्तरिकशक्तेः तथा नैतिकचरित्रस्य विकासं संयोजयति। अतः विवेकानन्दीयशिक्षादर्शनस्य अध्ययनं केवलं भारतीयपरम्परायाः ऐतिहासिकाध्ययनं न, अपितु contemporary global education discourse इत्यस्य सन्दर्भे अपि उपयोगि भवितुम् अर्हति।

**19. अध्ययनस्य सीमाः-** प्रस्तुतशोधः मुख्यतः ऐतिहासिक-अभिलेखीयस्रोताधारितः अस्ति। अतः महमण्डलस्य कार्यक्रमाणां प्रत्यक्ष educational outcomes इत्यस्य statistical measurement अस्मिन् अध्ययनं न कृतम्।

अतः भविष्ये निम्नलिखितक्षेत्रेषु शोधः आवश्यकः—

i.पूर्वप्रतिभागिनां मौखिक-इतिहासस्य अध्ययनम्।
Former participants' oral history.

ii.प्रतिभागिनां दीर्घकालिक-अनुवर्तनात्मक-अध्ययनम्।
Longitudinal study of participants.

iii.प्रशिक्षणकार्यक्रमाणां पूर्वपरीक्षणोत्तरपरीक्षणाधारितम् अध्ययनम्।
Pre-test/post-test study of training programmes.

iv.अन्येषां युवासंस्थानां सह तुलनात्मकम् अध्ययनम्।
Comparative study with other youth organisations.

v.१९६८ तमवर्षात् आरभ्य 'विवेक-जीवन' पत्रिकायाः विषयवस्तु-विश्लेषणम्।
Content analysis of Vivek-Jivan from 1968 onwards.

vi.अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य विभिन्नराज्येषु स्थितकेन्द्राणां राज्यवारं ऐतिहासिकं तुलनात्मकम् अध्ययनम्।
State-wise historical comparison of ABVYM centres.

**.20. निष्कर्षः-**

स्वामीविवेकानन्दस्य शिक्षादर्शनं भारतीयशिक्षाचिन्तनस्य एकं महत्त्वपूर्णं मानवकेन्द्रितं प्रतिमानम् अस्ति। अस्य दर्शनस्य प्रमुखं लक्ष्यं केवलं ज्ञानार्जनं न, अपितु मनुष्यनिर्माणम्, चरित्रनिर्माणम्, आत्मशक्तेः जागरणम् तथा समाजसेवा इति अस्ति।

अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य कार्यपद्धतौ एते विचाराः विविधकार्यक्रमैः व्यवहाररूपं प्राप्नुवन्ति। Youth Training Camps अनुभवाधारितशिक्षां, Study Circles विचारात्मकसहभागितां, नेतृत्वकार्यक्रमाः उत्तरदायित्वं तथा सेवाकार्याणि सामाजिकशिक्षां प्रोत्साहयन्ति। अतः महमण्डलस्य कार्यपद्धतिः विवेकानन्दस्य शिक्षादर्शनस्य जीवन्त-व्यावहारिकप्रयोगः इति अवगन्तुं शक्यते। अस्य अध्ययनस्य व्यापकः निष्कर्षः अस्ति यत् शिक्षा यदि विद्यार्थिनं केवलं "ज्ञानी" करोति तर्हि सा अपूर्णा अस्ति; शिक्षा तं सक्षमं, चरित्रवान्, आत्मविश्वासयुक्तं, सेवाभावसम्पन्नं तथा उत्तरदायी नागरिकं कर्तुं प्रयतते चेत् सा वास्तविकरूपेण जीवननिर्माणकारी भवति। स्वामीविवेकानन्दस्य शिक्षादर्शनस्य एषा दृष्टिः वर्तमानस्य भारतीयस्य तथा वैश्विकस्य युवशिक्षाक्षेत्रस्य कृते अपि महत्त्वपूर्णं मार्गदर्शनं प्रदातुं शक्नोति।

**References**

**Primary Sources**

vii.Akhil Bharat Vivekananda Yuva Mahamandal. About Us. Kolkata: ABVYM.

viii.Akhil Bharat Vivekananda Yuva Mahamandal. Youth Training Camp: The Idea and Overview. Kolkata: ABVYM.

ix.Akhil Bharat Vivekananda Yuva Mahamandal. Annual All India Youth Training Camp. Kolkata: ABVYM.

x.Akhil Bharat Vivekananda Yuva Mahamandal. Annual Reports and Impact Statements. Kolkata: ABVYM.

xi.Akhil Bharat Vivekananda Yuva Mahamandal. Vivek-Jivan. Selected archival issues.

xii.Akhil Bharat Vivekananda Yuva Mahamandal. Vivek-Anjan. Selected issues.

**Secondary Sources**

i.Vivekananda, Swami. The Complete Works of Swami Vivekananda. Mayavati: Advaita Ashrama.

ii.Vivekananda, Swami. Lectures from Colombo to Almora. Kolkata: Advaita Ashrama.

iii.Vivekananda, Swami. My Master. Kolkata: Advaita Ashrama.

iv.Ramakrishna Math. Publications on Swami Vivekananda's life, philosophy and educational thought.